# अष्टमः पाठः–संसारसागरस्य नायकाः

**प्रश्न 1:**

एकपदेन उत्तरत-

(क) कस्य राज्यस्य भागेषु गजधरः शब्दः प्रयुज्यते?

(ख) गजपरिमाणं कः धारयति?

(ग) कार्यसमाप्तौ वेतनानि अतिरिच्य गजधरेभ्यः किं प्रदीयते स्म?

(घ) के शिल्पिरूपेण न समादृताः भवन्ति?

**उत्तर 1:**

(क) राजस्थानस्य

(ख) गजधरः

(ग) सम्मानम्

(घ) गजधराः

**प्रश्न 2:**

अधोलिखितानां प्रश्नानामुत्तराणि लिखत-

(क) तडागाः कुत्र निर्मीयन्ते स्म?

(ख) गजधराः कस्मिन् रूपे परिचिताः?

(ग) गजधराः किं कुर्वन्ति स्म?

(घ) के सम्माननीयाः?

**उत्तर 2:**

(क) तडागाः अशेषे हि देशे निर्मीयन्ते स्म?

(ख) गजधराः समाजस्य गाम्भीर्यस्य मापकाः इति रूपेण परिचिताः?

(ग) गजधराः नवनिर्माणस्य योजनां प्रस्तुन्वन्ति स्म, भाविव्ययम् आकलयन्ति स्म, उपकरणभारान् संगृहणन्ति स्म।

(घ) गजधराः सम्माननीयाः।

**प्रश्न 3:**

रेखाङ्कितानि पदानि आधृत्य प्रश्न-निर्माणं कुरुत-

(क) सुरक्षाप्रबन्धनस्य दायित्वं गजधराः निभालयन्ति स्म।

(ख) तेषां स्वामिनः असमर्थाः सन्ति।

(ग) कार्यसमाप्तौ वेतनानि अतिरिच्य सम्मानमपि प्राप्नुवन्ति।

(घ) गजधरः सुन्दरः शब्दः अस्ति।

(ङ) तडागाः संसारसागराः कथ्यन्ते।

**उत्तर 3:**

(क) **कस्य** दायित्वं गजधराः निभालयन्ति स्म।

(ख) **केषां** स्वामिनः असमर्थाः सन्ति।

(ग) कार्यसमाप्तौ **कानि** अतिरिच्य सम्मानमपि प्राप्नुवन्ति।

(घ) **कः** सुन्दरः शब्दः अस्ति।

(ङ) **के** संसारसागराः कथ्यन्ते।

**प्रश्न 4:**

अधोलिखितेषु यथापेक्षितं सन्धिं/विच्छेदं कुरुत-

(क) अद्य + अपि = ..............

(ख) .......... + .......... = स्मरणार्थम्

(ग) इति + अस्मिन् = ..............

(घ) .......... + .......... = एतेष्वेव

(ङ) सहसा + एव = ..............

**उत्तर 4:**

(क) अद्य + अपि = **अद्यापि**

(ख) **स्मरण** + **अर्थम्** = स्मरणार्थम्

(ग) इति + अस्मिन् = **इत्यस्मिन्**

(घ) **एतेषु** + **एव** = एतेष्वेव

(ङ) सहसा + एव = **सहसैव**

**प्रश्न 5:**

मञ्जूषात: समुचितानि पदानि चित्वा रिक्तस्थानानि पूरयत-

| | | | | |
|---|---|---|---|---|
| रचयन्ति | गृहीत्वा | सहसा | जिज्ञासा | सह |

(क) छात्रा: पुस्तकानि .................. विद्यालयं गच्छन्ति।

(ख) मालाकारा: पुष्पै: माला: ..............................।

(ग) मम मनसि एका ............................. वर्तते।

(घ) रमेश: मित्रै: ............... विद्यालयं गच्छति।

(ङ) ..................... बालिका तत्र अहसत।

**उत्तर 5:**

(क) छात्रा: पुस्तकानि **गृहीत्वा** विद्यालयं गच्छन्ति।

(ख) मालाकारा: पुष्पै: माला: **रचयन्ति**।

(ग) मम मनसि एका **जिज्ञासा** वर्तते।

(घ) रमेश: मित्रै: **सह** विद्यालयं गच्छति।

(ङ) **सहसा** बालिका तत्र अहसत।

**प्रश्न 6:**

पदनिर्माणं कुरुत-

| | धातु: | | प्रत्यय: | | पदम् |
|---|---|---|---|---|---|
| यथा- | कृ | + | तुमुन् | = | कर्तुम् |
| | हृ | + | तुमुन् | = | ............ |
| | तृ | + | तुमुन् | = | ............ |
| यथा- | नम् | + | क्त्वा | = | नत्वा |
| | गम् | + | क्त्वा | = | ............ |
| | त्यज् | + | क्त्वा | = | ............ |
| | भुज् | + | क्त्वा | = | ............ |

| | उपसर्गः | धातुः | प्रत्ययः | = | पदम् |
|---|---|---|---|---|---|
| यथा- | उप | गम् | ल्यप् | = | उपगम्य |
| | सम् | पूज् | ल्यप् | = | ................ |
| | आ | नी | ल्यप् | = | ................ |
| | प्र | दा | ल्यप् | = | ................ |

**उत्तर 6:**

| | धातुः | | प्रत्ययः | | पदम् |
|---|---|---|---|---|---|
| यथा- | कृ | + | तुमुन् | = | कर्तुम् |
| | हृ | + | तुमुन् | = | **हतुम्** |
| | तृ | + | तुमुन् | = | **तर्तुम्** |
| यथा- | नम् | + | क्त्वा | = | नत्वा |
| | गम् | + | क्त्वा | = | **गत्वा** |
| | त्यज् | + | क्त्वा | = | **त्यक्त्वा** |
| | भुज् | + | क्त्वा | = | **भुक्त्वा** |

| | उपसर्गः | धातुः | प्रत्ययः | = | पदम् |
|---|---|---|---|---|---|
| यथा- | उप | गम् | ल्यप् | = | उपगम्य |
| | सम् | पूज् | ल्यप् | = | **संपूज्य** |
| | आ | नी | ल्यप् | = | **आनीय** |
| | प्र | दा | ल्यप् | = | **प्रदाय** |

**प्रश्न 7:**

कोष्ठकेषु दत्तेषु शब्देषु समुचितां विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत-

यथा- विद्यालयं परितः वृक्षाः सन्ति। (विद्यालय)

(क) .................. उभयतः ग्रामाः सन्ति। (ग्राम)

(ख) .................. सर्वतः अट्टालिकाः सन्ति। (नगर)

(ग) धिक् ..................। (कापुरुष)

**यथा-** मृगा: मृगै: सह धावन्ति। (मृग)

(क) बालका: .................... सह पठन्ति। (बालिका)

(ख) पुत्र .................... सह आपणं गच्छति। (पितृ)

(ग) शिशु: .................... सह क्रीडति। (मातृ)

**उत्तर 7:**

**यथा-** **विद्यालयं** परित: वृक्षा: सन्ति। (विद्यालय)

(क) **ग्रामम्** उभयत: ग्रामा: सन्ति। (ग्राम)

(ख) **नगरम्** सर्वत: अट्टालिका: सन्ति। (नगर)

(ग) धिक् **कापुरुषम्**। (कापुरुष)

**यथा-** मृगा: **मृगै:** सह धावन्ति। (मृग)

(क) बालका: **बालिकाभि:** सह पठन्ति। (बालिका)

(ख) पुत्र **पित्रा** सह आपणं गच्छति। (पितृ)

(ग) शिशु: **मात्रा** सह क्रीडति। (मातृ)